# चतुर्थः पाठः

# काव्यदीपशिखा

## पाठप्रवेशः

महाकाव्यानां पठनेन पौराणिकानां कवीनां कल्पानाचातुर्यं तत्कालसामाजिकानां व्यवहारं च अवगन्तुं शक्यते। अनेकेषु महाकाव्येषु सत्स्वपि पञ्चमहाकाव्यानि अतिप्रसिद्धानि भवन्ति। तेषु अन्यतममस्ति रघुवंशम्। तस्मात् सङ्कलितान् चतुरः श्लोकान् अत्र परिचिनुमः।

## आमुखम्

संस्कृतसाहित्ये अनेकानि महाकाव्यानि सन्ति। तेषु कालिदासस्य कुमारसम्भवम्, रघुवंशम्, भारवेः किरातार्जुनीयम्, माघस्य शिशुपालवधम्, श्रीहर्षस्य नैषधीयचरितं च पञ्चमहाकाव्यानि इति प्रथितानि। एतेषां महाकाव्यानां रचनावसरे भाषाप्रयोगाणां वैशिष्ट्येन कालिदासः 'दीपशिखाकालिदासः' इति, भारविः 'छत्रभारविः' इति, माघः 'घण्टामाघः' इति च पश्चात् प्रसिद्धाः अभवन्। नैषधीयचरितं काव्यं 'विद्वदौषधम्' इति च। रघुवंशस्य षष्ठसर्गे इन्दुमत्याः स्वयंवरसन्दर्भः उपवर्णितः। तत्र प्रयुक्तस्य अलङ्कारस्य चारुतया कालिदासः 'दीपशिखाकालिदासः' इति प्रसिद्धिम् अवाप। तमेव सन्दर्भम् अत्र पठामः।

**स्वसुर्विदर्भाधिपतेस्तदीयो**
**लेभेऽन्तरं चेतसि नोपदेशः ।**
**दिवाकरादर्शनबद्धकोशे**
**नक्षत्रनाथांशुरिवारविन्दे ॥**

**पदच्छेदः**

| | | |
|---|---|---|
| स्वसुर्विदर्भाधिपतेस्तदीयो | - | स्वसुः + विदर्भाधिपतेः + तदीयः । |
| लेभेऽन्तरं | - | लेभे + अन्तरम् । |
| नोपदेशः | - | न + उपदेशः । |
| नक्षत्रनाथांशुरिव | - | नक्षत्रनाथांशुः + इव । |

**विग्रहः**

| | | |
|---|---|---|
| विदर्भाधिपतेः | - | विदर्भस्य अधिपतिः विदर्भाधिपतिः,तस्य । |
| दिवाकरादर्शनबद्धकोशे | - | दिवाकरस्य अदर्शनेन बद्धः कोशः, तस्मिन् । |
| नक्षत्रनाथांशुः | - | नक्षत्राणां नाथः नक्षत्रनाथः(चन्द्रः) तस्य अंशुः । |

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| विदर्भाधिपतेः | - | विदर्भराजस्य (भोजस्य) |
| स्वसुः | - | सोदर्याः |
| चेतसि | - | मनसि |
| तदीयः उपदेशः | - | तया कृतं विवरणम् |
| दिवाकरादर्शनबद्धकोशे | - | सूर्यस्य अदर्शनेन सङ्कुचिते |
| अरविन्दे | - | पद्मे |
| नक्षत्रनाथांशुः इव | - | चन्द्रमयूखः इव |
| अन्तरं | - | प्रवेशं |
| न लेभे । | - | न अलभत । |

**भावार्थः**

विदर्भाधिपस्य सोदर्याः इन्दुमत्याः सखी कञ्चन राजकुमारम् अधिकृत्य सविस्तरं प्रत्यपादयत्। तथापि सूर्यास्तमने मुकुलाकारे कमलोदरे चन्द्रकिरणः इव इन्दुमत्याः मनसि तस्याः उपदेशः न प्रविष्टः।

**कोशः**

चेतः – चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः।



**सञ्चारिणी दीपशिखेव रात्रौ**
**यं यं व्यतीयाय पतिंवरा सा।**
**नरेन्द्रमार्गाट्ट इव प्रपेदे**
**विवर्णभावं स स भूमिपालः॥**

**पदच्छेदः**

दीपशिखेव - दीपशिखा + इव।

**विग्रहः**

पतिंवरा - पतिं वृणीते या सा।

नरेन्द्रमार्गाट्टः - नरेन्द्रस्य मार्गः नरेन्द्रमार्गः, तत्रस्थः अट्टः।

भूमिपालः - भूमिं पालयति इति।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| पतिंवरा | - | स्वयंवरसन्नद्धा |
| सा | - | इन्दुमती |
| रात्रौ | - | निशायां |
| सञ्चारिणी | - | सञ्चरणशीला (गमनशीला) |
| दीपशिखा इव | - | दीपज्वाला इव |
| यं यं व्यतीयाय | - | यं यं राजानम् अतीत्य गता |
| स स भूमिपालः | - | स स भूपालः |
| नरेन्द्रमार्गाट्ट इव | - | राजपथे स्थितः निरीक्षणालयः इव |
| विवर्णभावम् | - | (निराशया) वैवर्ण्यं |
| प्रपेदे | - | प्राप्तवान्। |

**भावार्थः**

रात्रौ सञ्चरणशीला दीपशिखा यथा नरेन्द्रमार्गं प्रपद्य अट्टान् अतीत्य तान् निष्प्रभान् करोति तथा पतिंवरा सा कुमारी यं यं राजकुमारम् अतीतवती तस्य तस्य मुखं विगतवर्णम् अभवत्।



तं प्राप्य सर्वावयवानवद्यं
व्यावर्ततान्योपगमात्कुमारी ।
न हि प्रफुल्लं सहकारमेत्य
वृक्षान्तरं काङ्क्षति षट्पदाली ॥

**पदच्छेदः**

| | | |
|---|---|---|
| व्यावर्ततान्योपगमात्कुमारी | - | व्यावर्तत + अन्योपगमात् + कुमारी । |
| सहकारमेत्य | - | सहकारम् + एत्य । |

**विग्रहः**

| | | |
|---|---|---|
| सर्वावयवानवद्यं | - | न अवद्यः अनवद्यः, सर्वे च ते अवयवाश्च सर्वावयवाः सर्वावयवेषु अनवद्यः यस्य सः सर्वावयवानवद्यः, तं सर्वावयवानवद्यम्। |
| अन्योपगमात् | - | अन्यस्य उपगमः अन्योपगमः , तस्मात्। |
| वृक्षान्तरम् | - | अन्यः वृक्षः। |
| षट्पदाली | - | षट्पदानाम् आली। |

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| कुमारी | - | इन्दुमती |
| सर्वावयवानवद्यम् | - | सर्वावयवरम्यम् |
| तं प्राप्य | - | अजम् उपगम्य |
| अन्योपगमात् | - | राजान्तरसमीपगमनात् |
| व्यावर्तत | - | विमुखा अभवत्। |
| हि | - | यतः |
| षट्पदाली | - | भृङ्गावलिः |
| प्रफुल्लम् | - | विकसितम् |
| सहकारम् | - | चूतम् |
| एत्य | - | प्राप्य |
| वृक्षान्तरम् | - | अपरवृक्षम् |
| न कांक्षति | - | न इच्छति। |

**भावार्थः**

भृङ्गाः प्रफुल्लं चूतवृक्षम् सम्प्राप्य अन्यं वृक्षं गन्तुं नेच्छन्ति तथा सा इन्दुमती अङ्गलावण्ययुक्तं तं राजकुमारम् उपगम्य ततः गन्तुं नोत्सुका अभवत्।

**कोशः**

षट्पदः-

मधुव्रतो मधुकरो मधुलिण्मधुपालिनः।
द्विरेफपुष्पलिड्भृङ्गषट्पदभ्रमरालयः॥



**कुलेन कान्त्या वयसा नवेन**
**गुणैश्च तैस्तैर्विनयप्रधानैः ।**
**त्वमात्मनस्तुल्यममुं वृणीष्व**
**रत्नं समागच्छतु काञ्चनेन ॥**

**पदच्छेदः**

| | | |
|---|---|---|
| गुणैश्च | - | गुणैः + च । |
| तैस्तैर्विनयप्रधानैः | - | तैः + तै: + विनयप्रधानै : । |
| त्वमात्मनस्तुल्यममुम् | - | त्वम् + आत्मनः + तुल्यम् + अमुम् । |

**विग्रहः**

विनयप्रधानैः - विनयः प्रधानं येषां , तैः।

| अन्वयः | | अन्वयार्थः |
|---|---|---|
| कुलेन | - | गोत्रेण |
| कान्त्या | - | लावण्येन |
| नवेन वयसा | - | यौवनेन |
| विनयप्रधानैः | - | विनयप्रकृतिभिः |
| तैस्तैर्गुणैश्च | - | श्रुतशीलादिभिः गुणैःच |
| आत्मनस्तुल्यं | - | स्वानुरूपं |
| अमुं | - | एनम् अजं |
| त्वं वृणीष्व | - | त्वं स्वीकुरु । |

| | | |
|---|---|---|
| रत्नं | - | मणिः |
| काञ्चनेन | - | सुवर्णेन (सह) |
| समागच्छतु | - | संगच्छताम्। |

**भावार्थः**

एषः अजः सूर्यवंशोद्भवः भवति। कान्त्या तारुण्येन विनयादिभिः शीलगुणैश्च अनुरूपः अयं राजकुमार एव ते योग्यः। रत्नं सुवर्णेन सह एव समागच्छतु।

**कोशः**

| | | |
|---|---|---|
| कुलम् | - | सन्ततिर्गोत्रजननकुलान्यभिजनान्वयौ। |
| रत्नम् | - | रत्नं मणिर्द्वयोरश्मजातौ मुक्तादिकेऽपि च। |

## पठनप्रवर्तनानि



**पाठभागस्थान् श्लोकान् वैयक्तिकरूपेण सङ्घरूपेण वा कक्ष्यायाम् आलपतु।**

**श्रद्धेयाः अंशाः**

अक्षरस्फुटता।

पदार्थबोधः।

आशयव्यक्तता।



**पाठभागस्थानां श्लोकानां गद्यक्रमं लिखतु।**

**श्रद्धेयाः अंशाः**

आशयावबोधः।

विशेषणविशेष्यज्ञानम्।

उचितः वाक्यप्रयोगः।



**पञ्चमहाकाव्यान्यधिकृत्य सूचनानुसारं टिप्पणीं लिखतु ।**

**सूचनाः -** काव्यभेदः - श्रव्यकाव्यानि - प्रसिद्धाः संस्कृतकवयः - पञ्चमहाकाव्यानि - तेषां कर्तारः ।

**श्रद्धेयाः अंशाः**

भाषाशुद्धिः।

आशयव्यक्तता ।

सूचनानां स्वीकारः ।

टिप्पणीघटना ।



**इष्टतमश्लोकस्य आस्वादनटिप्पणीं लिखतु ।**

**श्रद्धेयाः अंशाः**

भाषाशुद्धिः।

आशयव्यक्तता ।

श्लोकानाम् अर्थावबोधः ।

## क्रियापदपरिचयः

**व्यतीयाय** - वि अति उपसर्गपूर्वक इण् गतौ परस्मैपदी लिट् प्र.पु.ए.व ।
व्यतीयाय - व्यतीयतुः - व्यतीयुः ।

**प्रपेदे** - प्र उपसर्गपूर्वक पत्लृ गतौ आत्मनेपदी लिट् प्र.पु.ए.व ।
प्रपेदे - प्रपेदाते - प्रपेदिरे ।

**व्यावर्तत** - वि+आ+वृतु वर्तने आत्मनेपदी लङ् प्र.पु.ए.व ।
व्यावर्तत - व्यावर्तेताम् - व्यावर्तन्त ।

**वृणीष्व** - वृञ् वरणे उभयपदी आत्मनेपदे लोट् म.पु.ए.व ।
वृणीष्व - वृण्वाथाम् - वृणुध्वम् ।

## अधिकवाचनांशः

### कालिदासस्य कृतयः ।

| | | |
|---|---|---|
| **द्वे महाकाव्ये** | - | रघुवंशम् , कुमारसम्भवम् च । |
| **त्रीणि नाटकानि** | - | अभिज्ञानशाकुन्तलम् , विक्रमोर्वशीयम् , मालविकाग्निमित्रम् । |
| **द्वे खण्डकाव्ये** | - | ऋतुसंहारः, मेघदूतम् । |

### बिरुदालङ्कृताः केचन कवयः

| | | |
|---|---|---|
| कालिदासः | - | दीपशिखा कालिदासः । |
| श्रीकण्ठः | - | भवभूतिः । |
| भारविः | - | छत्रभारविः। |
| माघः | - | घण्टामाघः। |
| मुरारिः | - | इन्दुमुरारिः |
| बाणः | - | तुरङ्गबाणः । |

तूलिकानाम्ना प्रसिद्धानां केषाञ्चन साहित्यकाराणां नामानि वदन्तु ।